12

1075CH12

# अशुद्धिसंशोधनम्

अध्यापक: — 'तुम सब पुस्तक पढ़ो' – अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादं कुरुत।

(छात्रा: विचिन्तयन्ति)

अध्यापक: — कृतम् किम्?

(छात्रा: विचारमग्ना:)

अध्यापक: — उमेश! भवान् वदतु।

उमेश: — यूयं पुस्तकं पठन्तु।

अध्यापक: — 'यूयं पुस्तकं पठन्तु' इति अशुद्धं वाक्यम्। अमित! उत्तिष्ठ। शुद्धं करोतु।

अमित: — यूयं पुस्तकं पठत।

अध्यापक: — अतिसुन्दरम्। एतद् एव शुद्धं वाक्यम्।

छात्रा: — आम्।

अध्यापक: — संस्कृते बहूनि कारणानि भवन्ति यै: वाक्यानि अशुद्धानि भवन्ति।

(किञ्चित् विरम्य)

अध्यापक: — किं भवन्त: जानन्ति अशुद्धय: कियत्य: भवन्ति। पश्यन्तु

(अध्यापक: श्यामपट्टे लिखति।)

**1. कर्तृक्रिययो: अशुद्धय:—**

| **अशुद्धम् वाक्यम्** | | **शुद्धम् वाक्यम्** |
|---|---|---|
| (i) त्वं पाठं पठति। | — | त्वं पाठं पठसि। |
| (ii) ते लेखं लिखति। | — | ते लेखं लिखन्ति। (पुल्लिङ्गे) |
| | | ते लेखं लिखत:। (स्त्रीलिङ्गे) |
| (iii) वयं भोजनं खादामि। | — | वयं भोजनं खादाम:। |

© NCERT not to be republished

(iv) यूयं बहि: गच्छ। — यूयं बहि: गच्छत।

(v) त्वं लेखं लिखतु । — त्वं लेखं लिख।

(vi) युवां भोजनं खादताम् । — युवां भोजनं खादतम्।

(vii) आवां खेलनाय गच्छाम:। — आवां खेलनाय गच्छाव:।

(viii) अहं तत्र गमिष्याम:। — अहं तत्र गमिष्यामि।

(ix) स: एव बुद्धिमान् सन्ति । — स: एव बुद्धिमान् अस्ति।

(x) तौ उपवने क्रीडाव:। — तौ उपवने क्रीडत:।

(xi) ता: भोजनं पचति। — ता: भोजनं पचन्ति।

**2. विशेषणविशेष्ययो: अशुद्धय:—**

(i) चतुर: बाला: वदन्ति। — चतुरा: बाला: वदन्ति।

(ii) एक: कन्या एव एवं वदति । — एका कन्या एव एवं वदति।

(iii) नील: गगनं शोभते। — नीलं गगनं शोभते।

(iv) कुशला बाला: एव प्रश्नं पृच्छन्ति। — कुशला: बाला: एव प्रश्नं पृच्छन्ति।

(v) मधुरं फलानि खाद। — मधुरं फलं खाद।

(vi) कुशल: बाला एव स:। — कुशल: बाल: एव स:।

(vii) सुन्दराणि चित्रं स: रचयति। — सुन्दराणि चित्राणि स: रचयति।

(viii) तत् फलानि मधुराणि सन्ति। — तानि फलानि मधुराणि सन्ति।

(ix) ते बालिका: बुद्धिमत्य: सन्ति। — ता: बालिका: बुद्धिमत्य: सन्ति।

**3. लिङ्गसम्बन्धि–अशुद्धय:—**

(i) ते मम मित्रा: सन्ति। — तानि मम मित्राणि सन्ति।

(ii) फला: करण्डके सन्ति। — फलानि करण्डके सन्ति।

(iii) वृक्षाणि हरिता: सन्ति। — वृक्षा: हरिता: सन्ति।

(iv) उपवने पुष्पा: सन्ति। — उपवने पुष्पाणि सन्ति।

(v) शाखेषु खगा: सन्ति। — शाखासु खगा: सन्ति।

(vi) देवालयासु देवा: वसन्ति। — देवालयेषु देवा: वसन्ति।

© NCERT not to be republished



Reprint 2026-27

(vii) उपवन: सुन्दरम् अस्ति। — उपवनं सुन्दरम् अस्ति।
(viii) वन: अतिविस्तृतम् अस्ति। — वनम् अतिविस्तृतम् अस्ति।
(ix) खगानि आकाशे उड्डयन्ते। — खगा: आकाशे उड्डयन्ते।
(x) राधाया: ग्रीवम् शोभना अस्ति। — राधाया: ग्रीवा शोभना अस्ति।

**4. वाच्यसम्बन्धि–अशुद्धय:—**

(i) स: पाठ: पठ्यते। — तेन पाठ: पठ्यते।
(ii) तेन फलानि खाद्यते। — तेन फलानि खाद्यन्ते।
(iii) त्वम् लेख: लिख्यते। — त्वया लेख: लिख्यते।
(iv) त्वया ग्रन्थान् पठ्यन्ते। — त्वया ग्रन्था: पठ्यन्ते।
(v) त्वया भोजनं करोषि। — त्वया भोजनं क्रियते।
(vi) मया पाठा: स्मरामि । — मया पाठा: स्मर्यन्ते ।
(vii) तया कार्यं क्रियन्ते । — तया कार्यं क्रियते ।
(viii) अहं नियमा: पाल्यन्ते। — मया नियमा: पाल्यन्ते।
(ix) राधया गीतं गायति। — राधा गीतं गायति।
(x) अमितेन प्रात: उत्तिष्ठति। — अमितेन प्रात: उत्थीयते।

**5. उपपदसम्बन्धि–अशुद्धय:—**

(i) सीता रामस्य सह वनम् अगच्छता। — सीता रामेण सह वनम् अगच्छत्।
(ii) स: ग्रामस्य प्रति गच्छति। — स: ग्रामं प्रति गच्छति।
(iii) राधा मात्रे सदृशी अस्ति। — राधा मात्रा सदृशी अस्ति।
(iv) पिता पुत्रे क्रुध्यति। — पिता पुत्राय क्रुध्यति।
(v) स: अश्वेन पतति। — स: अश्वात् पतति।
(vi) स: विद्यालयेन आगच्छति। — स: विद्यालयात् आगच्छति।
(vii) वयं ग्रामे गमिष्याम:। — वयं ग्रामं गमिष्याम:।
(viii) बालक: कुक्कुरेण बिभेति। — बालक: कुक्कुरात् बिभेति।
(ix) पिता पुत्राय विश्वसिति। — पिता पुत्रे विश्वसिति।
(x) माता पुत्रीं स्निह्यति। — माता पुत्र्यां स्निह्यति।



Reprint 2026-27

© NCERT not to be republished

**6. वचनसम्बन्धि–अशुद्धयः—**

(i) सः पाठं पठन्ति। — सः पाठं पठति।

(ii) वयं लेखं लिखामि। — वयं लेखं लिखामः।

(iii) त्वं कुत्र गच्छथ। — त्वं कुत्र गच्छसि।

(iv) ते पाठं स्मरति। — ते पाठं स्मरन्ति।

(v) यूयं तत्र गच्छतम्। — यूयं तत्र गच्छत।

(vi) सर्वे शक्तिमन्तः अस्ति। — सर्वे शक्तिमन्तः सन्ति।

(vii) त्वया सर्वाणि कार्याणि करणीयम्। — त्वया सर्वाणि कार्याणि करणीयानि।

(viii) ताः कन्याः तत्र अस्ति। — ताः कन्याः तत्र सन्ति।

(ix) तौ बालकौ गच्छति। — तौ बालकौ गच्छतः।

(x) ते बालिके पठन्ति। — ते बालिके पठतः।

**7. संख्यासम्बन्धि–अशुद्धयः—**

(i) त्रयः बालिकाः वार्तालापं कुर्वन्ति। — तिस्रः बालिकाः वार्तालापं कुर्वन्ति।

(ii) चत्वारः बालिकाः क्रीडन्ति। — चतस्रः बालिकाः क्रीडन्ति।

(iii) एका पुरुषः कार्यं करोति। — एकः पुरुषः कार्यं करोति।

(iv) त्रीणि सैनिकाः देशं रक्षन्ति। — त्रयः सैनिकाः देशं रक्षन्ति।

(v) पञ्चाः बालकाः पठन्ति। — पञ्च बालकाः पठन्ति।

(vi) द्वे बालकौ खादतः। — द्वौ बालकौ खादतः।

(vii) त्रयः पुस्तकानि सन्ति। — त्रीणि पुस्तकानि सन्ति।

(viii) एकः पात्रं तत्र अस्ति। — एकं पात्रं तत्र अस्ति।

(ix) त्रीणि पुरुषाः एव कार्यं कुर्वन्ति। — त्रयः पुरुषाः एव कार्यं कुर्वन्ति।

(x) चत्वारः कन्याः प्रसीदन्ति। — चतस्रः कन्याः प्रसीदन्ति।

**8. अन्याः अशुद्धयः—**

(i) राधा श्वः गच्छति। — राधा श्वः गमिष्यति।

(ii) बालकः ह्यः गच्छति। — बालकः ह्यः अगच्छत्।

(iii) भवान् किं कथयसि। — भवान् किं कथयति।



© NCERT not to be republished

Reprint 2026-27

(iv) रमा श्व: करोति । — रमा श्व: करिष्यति।

(v) स: ह्य: न पठति । — स: ह्य: न अपठत्।

## अभ्यास:

**1. अधोलिखितानि वाक्यानि शुद्धानि कुरुत —**

(i) वयं चित्रं पश्यन्ति। ..........

(ii) भवान् भोजनं खाद। ..........

(iii) त्वं पाठं स्मरतु। ..........

(iv) स: पीत: वस्त्रं धारयति। ..........

(v) त्रीणि वृक्षा: तत्र शोभन्ते। ..........

(vi) ता: महिला: न गमिष्यति। ..........

(vii) त्वम् किं क्रियते। ..........

(viii) पिता श्व: आगच्छति। ..........

(ix) युष्माभि: किं पठन्ति। ..........

(x) स: तत्र न सन्ति। ..........

(xi) अमितेन एतत् कार्यं करोति । ..........

(xii) यूयं तत्र न गन्तव्यम्। ..........

(xiii) मया एतानि फलानि खादितव्यम् । ..........

(xiv) कन्या: पाठं पठति। ..........

(xv) अम्बा भोजनं पचन्ति । ..........

(xvi) तेन भोजनं खादनीयानि । ..........

(xvii) अम्बा तत्र सन्ति। ..........

(xviii) त्वम् जलं पानीयम्। ..........

(xix) ते लेखान् लिखति। ..........

(xx) अस्माभि: फलानि खाद्यते। ..........

© NCERT not to be republished



Reprint 2026-27